समुद्धृत्य कुण्डोपरि त्रिः परिभ्राम्य जानुस्पृष्टमहीतलः शिवबीजबुद्ध्या आत्मनोऽभिमुखं देश्या योनौ एन क्षिपेत् । ततो ह्रीं वह्निमूर्त्तये नमः इत्यभ्यर्च्य रं वह्निचैतन्याय नमः इति चैतन्यं तत्र संयोज्य ॐ चित् पिङ्गल हन हन दह दह पच पच सर्व्वं ज्ञापय ज्ञापय स्वाहा इति ज्वालयेत् । ततः ।

"अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ॥"

इत्युपतिष्ठेत् ॥

ततो अग्ने त्वममुकनामासीति नाम कृत्वा ॐ वैश्वानरं जातवेद इहावह लोहिताक्ष सर्व्वकर्म्माणि साधय स्वाहा । अनेनार्घ्यादिभिः संपूज्य ॐ अग्नेर्हिरण्यादिसप्तजिह्वाभ्यो नमः । ॐ सहस्रार्च्चिषे हृदयाय नमः इत्यादि अग्निषडङ्गेभ्यो नमः । ॐ अग्नये जातवेदसे इत्याद्यष्टमूर्त्तिभ्यो नमः । तद्वाह्ये ॐ ब्राह्म्याद्यष्टशक्तिभ्यो नमः । तद्बहिः ॐ पद्माद्यष्टनिधिभ्यो नमः । तद्वाह्ये ॐ इन्द्रादिलोकपालेभ्यो नमः । तद्वाह्ये ॐ वज्राद्यस्त्रेभ्यो नमः । ततः प्रादेशमात्रं कुशपत्रद्वयं घृतमध्ये निक्षिप्य सव्यासव्यमध्यभागेषु इड़ां पिङ्गलां सुषुम्नां ध्यात्वा होमं कुर्य्यात् । स्रुवेण दक्षिणभागादाज्यं गृहीत्वा ॐ अग्नये स्वाहा इति अग्नेर्दक्षिणनेत्रे जुहुयात् । तथा वामभागादाज्यं गृहीत्वा ॐ सोमाय स्वाहा इति वामनेत्रे जुहुयात् । ततो मध्यभागादाज्यं गृहीत्वा ॐ अग्निसोमाभ्यां स्वाहा इत्यग्नेर्ललाटनेत्रे जुहुयात् । पुनर्दक्षिणतः नम इति घृतं गृहीत्वा ॐ अग्नये स्विष्टिकृते स्वाहा इत्यग्निमुखे । ततो महाव्याहृतिहोमः । ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्व्वकर्म्माणि साधय स्वाहा इत्यनेन त्रिवारं जुहुयात् । ततः अग्नौ मूलेन पीठपूर्व्वकं देवतां संपूज्य तन्मुखे घृतेन मूलमन्त्रेण पञ्चविंशतिवारं जुहुयात् । वह्निदेवतयोरात्मना सह ऐक्यं विभाव्य मूलमन्त्रेण एकादशाहुतीर्जुहुयात् । ततो मूलमन्त्रस्य अङ्गदेवताभ्यः स्वाहा शक्तस्तेत् प्रत्येकमेकैकाहुतिं जुहुयात् । ततः सङ्कल्पं विधाय तत्तत्कल्पोक्तद्रव्येण होमं कुर्य्यात् । ततो मूलमन्त्रेण पूर्णाहुतिं दत्त्वा संहारमुद्रया स्वेष्टदेवता हृदये समानीय क्षमस्वेति विसृज्य दक्षिणां दत्त्वा अच्छिद्रावधारणं कुर्य्यात् । इति तन्त्रसारः ॥ वृहद्धोमप्रयोगस्तु तत्रैव द्रष्टव्यः ॥

होमकः, पुं, (होम + संज्ञायां कन् ।) होता । यथा, मात्स्ये ९३ । १२८—१२९ श्लोकौ ।

"पूर्व्वद्वारे च संस्थाप्य बहृचं वेदपारगम् ।
यजुर्व्विदं तथा याम्ये पश्चिमे सामवेदिनम् ॥
अथर्व्ववेदिनं तद्वदुत्तरे स्थापयेद्बुधः ॥
अष्टौ तु होमकाः कार्य्या वेदवेदाङ्गवेदिनः ॥"

होमकुण्डं, क्ली, (होमार्थं कुण्डम् ।) होमार्थकुण्डम् । तत्पर्य्यायः । स्थण्डिलं २ । इति त्रिकाण्डशेषः ॥ अस्य विवरणं कुण्डशब्दे द्रष्टव्यम् ॥

होमधान्यं, क्ली, (होमोपयुक्तं धान्यम् ।) तिलः । इति राजनिर्घण्टः ॥

होमधूमः, पुं, (होमजातः धूमः ।) होमीयाग्निधूमः । तत्पर्य्यायः । निगणः २ । इति हेमचन्द्रः ॥

होमभस्म, [न्] क्ली, होमजातं भस्म । तत्पर्य्यायः । वैष्टुतम् २ । इति हेमचन्द्रः ॥

होमाग्निः, पुं, (होमस्य अग्निः ।) यज्ञवह्निः । तत्पर्य्यायः । महाज्वालः २ महावीरः ३ प्रवर्गः ४ । इति हेमचन्द्रः ॥

होमिः, पुं, (हूयते अस्मिन्निति । हु + इन् । मुट् च ।) अग्निः । (हूयते अनेनेति । इन् मुट् च ।) घृतम् । इति मेदिनी ॥ जलम् । इति शब्दरत्नावली ॥

होमी, [न्] पुं, (होमः अस्यास्तीति । इन् ।) होमकर्त्ता । यथा, तिथ्यादितत्त्वे ।

"तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः ।
तिलभुक् तिलवापी च षट्तिली नावसीदति ॥"

(जुहोतीति । हु + "उल्मुकदर्व्विहोमिनः ।" उणा० ३ । ८४ । इति मिनिः । निपातितश्च । यजमानः । इत्युणादिवृत्तौ उज्ज्वलदत्तः ॥)

होम्यं, क्ली, (होमाय हितम् । यत् ।) घृतम् । इति राजनिर्घण्टः ॥ होमीयद्रव्यमात्रे, त्रि ॥ (यथा, हरिवंशे भविष्यपर्व्वणि २५१ अध्याये ।

"होता पोता हन्ता नेता मन्ता होम्यहोता-
परात्परस्त्वम् ॥")

होरा, स्त्री, (होलति हुल्यते वेति । हुल हिंसासम्वरणयोः + अच् । घञ् वा । रलयोरैक्यम् टाप् ।) लग्नम् । राश्यर्द्धम् । रेखा । शास्त्रभेदः । इति मेदिनी ॥ द्वितीयार्थस्य विशेषो यथा, ज्योतिस्तत्त्वे ।

"विषमर्क्षेषु प्रथमहोराः स्युसहस्ररोचिषः ।
द्वितीयाः शशिनो युग्मे व्यत्ययाद्गणयेत् सदा ॥"

सार्द्धदण्डद्वयात्मककालः । स तु इंरेजानां आउयार इति ख्यातः । यथा, वह्निपुराणे गणभेदाध्याये ।

"चतुर्विंशतिवेलाभिरहोरात्रं प्रचक्षते ।
पश्चिमादर्द्धरात्रादिहोराणां विद्यते क्रमः ॥"

होलकः, पुं, (हु + विच् । लक्यते आस्वाद्यते इति । लक् + अप् ।) तृणाग्निभृष्टार्द्धपक्वशमीधान्यम् । होरा इति हिन्दी भाषा । यथा, भावप्रकाशे ।

"अर्द्धपक्वैः शमीधान्यैस्तृणभृष्टैश्च होलकः ।
होलकोऽल्पानिलो मेदःकफदोषश्रमापहः ॥
भवेद्यो होलको यस्य स च तत्तद्गुणो भवेत् ॥"

होलाकः, पुं, स्वेदविशेषः । यथा, चरकसूत्रस्थाने ।

"धीतीकान्तु करीषाणां यथोक्तानां प्रदीपयेत् ।
शयनान्तःप्रमाणेन शय्यामुपरि तत्र च ।
सुदग्धायां विधूमायां यथोक्तामुपकल्पयेत् ॥
स्ववच्छिन्नः सुखं तत्राभ्यक्तः स्विद्यति ना सुखम् ।
होलाकस्वेद इत्येष सुखप्रोक्तो महर्षिणा ॥"

धीतीका शुष्कगोमयकृतोऽग्निविशेषः ॥

होलाका, स्त्री, (हु + विच् । तं लाति । ला + संज्ञायां कन् टाप् ।) वसन्तोत्सवः । होली इति भाषा । इति दायभागटीका ॥ तदधिकरणन्यायो यथा । अथ होलाकाधिकरणम् । प्रतीच्यानां होलाकाचारदर्शनेन तदर्थां होलाका आचरणीया इति सामान्यविधिः कल्प्यते । न तु प्राच्यानामनाचरणात् प्रतीच्यैरिति तत्र पदं देयं सामान्यविधिनैव प्रतीच्याचारोपपत्तेः । प्राच्यानामनाचारस्य इच्छाविरहेणैव उपपत्तेः । इच्छाविरहस्य तद्देशीयपूर्व्वपूर्व्वनाचारदर्शनात् । प्रतीच्यानामुल्कादानाद्याचारविरहवत् । न ह्यनाचारार्थं वेदः कल्प्यते । तथा च यत्र सामान्यश्रुत्या उपपत्तिस्तत्र विशेषविधिर्न कल्प्यते गुरुरनुगन्तव्यः सदेतिवत् । न हि कर्म्मकाले तदसम्भवात् तदन्यकाले इति विशेषणीयम् । इति अधिकरणकौमुदी ॥*॥ अन्यच्च । यथा होलाकाधिकरणे प्राच्यकर्त्तृकहोलाकानुष्ठानोपपत्तये होलाका कर्त्तव्येत्येव श्रुतिः कल्पिता । तावतैव तदुपपत्तेः न तु प्राच्यादिपदवती कल्पनागौरवात् तद्वदत्रापि अर्ज्जकोंऽशद्वयं गृह्णीयादिति श्रुतिः कल्पनीया न तु पित्रादिपदवती तदयुक्तं तत्र प्राच्यकर्त्तृकानुष्ठानस्यावश्यकल्पनीयसामान्यश्रुत्यैवोपपत्तेः । न चाप्राच्यानामननुष्ठानार्थं प्राच्यपदवती कल्प्यतामिति वाच्यम् । तेषामननुष्ठानस्यानाचाररूपस्य श्रुतिकल्पनानिमित्तत्वानुपपत्तेः । इति दायभागः ॥

हौ, व्य, (हूयते अनेनेति । ह्वे + डौ ।) सम्बोधनम् । आह्वानम् । इति मेदिनी ॥

हौड, ऋ ङ गतौ, अनादरे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) चतुर्द्दशस्वरी । ऋ, अजुहौड़त् । ङ, हौड़ते । इति दुर्गादासः ॥

हौत्रकः, त्रि, (होतुरागतम् । "ऋतष्ठञ् ।" ४ ॥ ३ । ७८ । इति ठञ्) होतृसम्बन्धीयः । इति होतृशब्दात् कण्प्रत्ययेन निष्पन्नः ॥

हौम्यं, क्ली, (होमाय अर्हं । यत् ।) घृतम् । इति राजनिर्घण्टः ॥ होमीयद्रव्ये, त्रि ॥

हौम्यधान्यं, क्ली, (हौम्यञ्च तत् धान्यञ्च ।) तिलः । इति राजनिर्घण्टः ॥ इति केचित् ॥

ह्नु, ङ लु चौर्य्ये । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-सक०-अनिट् ।) ङ लु, ह्नुते । इति दुर्गादासः ॥

ह्मल, म चाले । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) म, प्रह्मलयति । मित्वेऽप्यस्य जौ ज्वलह्वलह्मल इत्यादिना केवलस्य ह्रस्वविकल्पनात् सोपसर्गस्यैव नित्यं ह्रस्वः । ह्मालयति ह्मलयति । चालश्चलनम् । इति दुर्गादासः ॥

ह्यः, [स्] व्य, (गतमहः । ह्यो निपातितः ।) गतदिनम् । इत्यमरः । ३ । ४ । २२ ॥ यथा, राजतरङ्गिण्याम् । ६ । ४६ ।

"त्वयि राजनि निश्चौरैरध्वभिर्विशतः सुखम् ।
ह्योऽभवन्नवणोत्से मे दिनान्ते शास्यतः स्थितिः ॥")

ह्यस्तनं, त्रि, (ह्यो भवम् । ह्यस् + "ऐषमोह्यः-